# आदर्शप्रश्नपत्रम् – 2021-22

## द्वितीयं सत्रम्

## कक्षा – द्वादशी

## संस्कृतम् (केन्द्रिकम्) (कोड सं.-322)

**समयः – होराद्वयम्** **सम्पूर्णाङ्काः – 40**

**सामान्यनिर्देशाः –**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 8 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 प्रमुखाः प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

# वर्णनात्मकाः प्रश्नाः 40 अङ्काः

| | अपठितावबोधनम् | |
|---|---|---|
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत -**<br>अधुना योगदर्शनस्य चर्चा सर्वत्र भवति। एतद् दर्शनं न केवलम् अतिप्राचीनम् अपितु नितान्तं वैज्ञानिकं दर्शनम्' अस्ति। महर्षिः पतञ्जलिः योगदर्शनम् उपदिष्टवान्। भारते एव योगदर्शनस्य आविर्भावः अभवत्। योगः देहात्मनोः प्रत्यक्षं वैज्ञानिकं साधनमस्ति। एतद्दर्शने शरीरस्य मनसः अपि नियमनं वर्णितम्। योगस्य परिभाषा अस्ति– "योगः चित्तवृत्तिनिरोधः"। चित्तवृत्तीनाम् अवरोधनेनैव योगस्य संसिद्धिः। अस्याम् अवस्थायां जीवः स्वरूपम् अधिगच्छति। योगस्य अष्ट अङ्गानि भवन्ति – यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः चेति। अस्माभिः जीवने सदा योगः सेवनीयः यतः योगेन जीवने नीरोगता आयाति। | 10 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) अधुना कस्य दर्शनस्य चर्चा सर्वत्र भवति?<br>(ii) योगदर्शनं कः उपदिष्टवान्?<br>(iii) योगस्य कति अङ्गानि सन्ति?<br>(iv) योगदर्शनस्य आविर्भावः कुत्र अभवत्?<br>(v) केषाम् अवरोधनेन योगस्य संसिद्धिः भवति? | ½×4=2 |
| | **(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) योगस्य परिभाषा का अस्ति?<br>(ii) अस्माभिः जीवने किमर्थं योगः सेवनीयः?<br>(iii) योगस्य अष्टाङ्गानां नामानि लिखत? | 2×2=4 |
| | **(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** | 1×1=1 |
| | **(ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)**<br>(i) "तिरोभावः" इत्यस्य विलोमपदं किम्?<br>(ii) "पुरातनम्" इत्यर्थे कः शब्दः अत्र प्रयुक्तः?<br>(iii) "अधुना योगदर्शनस्य चर्चा सर्वत्र भवति" अत्र क्रियापदं किम्?<br>(iv) "वैज्ञानिकं साधनम्" अत्र विशेषणपदं किं? | 1×3=3 |

<table>
<tr><td></td><td>रचनात्मककार्यम्</td><td></td></tr>
<tr><td>2.</td><td>भवान् सर्वेशः उदयपुरे वसति। भवान् उदयपुरस्य सौन्दर्यं द्रष्टुं स्वमित्रं चन्द्रेशम् आमन्त्रयति। अत्र मञ्जूषापदानां सहायतया इदं पत्रं सम्पूर्य पुनः लिखतु -<br><br>
दिनाङ्कः..................<br>
10/15, हिरण्यनगरी<br>
(i) ..................<br><br>
प्रिय सुहृद् (ii) .................... !<br>
सप्रेम नमः।<br>
अत्र सर्वं कुशलं वर्तते, भवतः कुशलताम् अपि इच्छामि। मित्रवर! इदम् उदयपुरनगरम् अतीव (iii) ........................ स्थानं वर्तते । इदं नगरं महाराणा-उदयसिंह-राजाधिराजेन (iv) .............................. आसीत्। इदं प्रतीयते यत् एतत् नगरं धरायाः (v) ................................ अस्ति। इदं सरोवराणां नगरमपि कथ्यते। यतः अत्र अनेके सरोवराः सन्ति। अनेन अत्र ग्रीष्मस्य अनुभवः अपि न भवति। निकटे एव महाराणा-प्रताप-महाभागानां स्मरणं कारयन्ती (vi) ................अपि वर्तते। अत्र भूमिः रक्तवर्णा अस्ति । समीपे एव स्थितं वैष्णव-सम्प्रदायस्य प्रसिद्धं (vii) .............. नाथद्वारा अपि अस्ति। यत्र जनाः अहर्निशं तीर्थयात्रां कर्तुम् आगच्छन्ति। एकलिङ्ग-महादेवस्य (viii) .................. आर्य-समाजस्य प्रवर्तकस्य महर्षि-दयानन्दस्य संस्मरणं कारयति। यत्र महर्षिः दयानन्दः सत्यार्थप्रकाश-महाग्रन्थं रचितवान् । मित्र ! मम अतीव अभिलाषा वर्तते यत् भवान् अवश्यमेव अस्य नगरस्य (ix) .................. अत्र आगच्छेत्। । शीघ्रं स्वागमनस्य सूचनां यच्छतु भवान् ।<br><br>
भवदीयं मित्रम्<br>
(x) ..................<br><br>
मञ्जूषा-<br><br>
देवालयः, हल्दीघाटी, चन्द्रेश, स्थापितम् दर्शनार्थम्,<br>
उदयपुरतः, सर्वेशः, स्वर्गम्, सौन्दर्ययुक्तम्, तीर्थम् ।</td><td>½×10=5</td></tr>
</table>

| | | |
|---|---|---|
| 3. | **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -**<br>एकदा एक: (i)........... काष्ठान्यानेतुं वनमगच्छत्। तत्र सहसैव वृक्षस्य करुणध्वनिं (ii)............ तिष्ठति। वृक्ष: समीपस्थं कर्तितं वृक्षं दृष्ट्वा रुदन्निव वदति स्म, ह्य: एक: काष्ठहार: काष्ठाय (iii)......... मित्रस्य शरीरमच्छिनत्। छेदनेनास्य शरीरे व्रणान् दृष्ट्वा अतीव दु:खितोऽहम्। (iv)......... नीत्वा स: तु आपणं गतवान् परं अत्र कोऽपि नास्ति योऽस्य व्रणानामुपचारं कुर्यात्। किमर्थं (v).......... जना: यदस्माकं शरीरं न केवलं काष्ठविक्रयणाय एवास्ति अपितु वायो: (vi).........., कूहानाशनाय, आतपेन श्रान्तेभ्य: पथिकेभ्य:, पशुभ्यश्च छायाप्रदानाय, खगेभ्य: (vii).........., व्याधितेभ्य: औषधये, बुभुक्षितेभ्य: फलप्रदानाय चाप्यस्ति। काष्ठविक्रयेण तु केवलमेकवारमेव एकस्यैव लाभ: जायते परमनेन चिरकालपर्यन्तं विविधा: प्राणिन: (viii).......... भवन्ति। फलौषधीनां प्राप्तिरपि दुर्लभा भवति। एवमेव एकैकं कृत्वाऽस्माकं सर्वेषां कर्तनेन वसन्तादीनां (ix)......... महत्त्वमपि विलुप्तं भविष्यति। इदं श्रुत्वा खिन्नमन: काष्ठहर: वृक्षकर्तनात् विरम्य (x).......... आरब्धवान्।<br><br>**मञ्जूषा-**<br>मम, विस्मरन्ति, ऋतूनाम्, निराश्रिता:, काष्ठहार:,<br>वृक्षारोपणम्, निवासाय, काष्ठानि, श्रुत्वा, शुद्धीकरणाय। | ½×10=5 |
| | **अथवा** | |
| | **अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु।**<br><br>**वैद्य:** - आगच्छ पुत्र। किं जातम् ? ज्वर: अस्ति किम्?<br>**राजीव:** - (i)....................................................।<br>**वैद्य:** - एवम्। ज्वर: न अस्ति । उदरे पीडा वर्तते। ह्य: किं भक्षितम्?<br>**राजीव:** - (ii) ...............................................।<br>**वैद्य:** - अहो! आपणे आलुकस्य वटका: खादिता:। किं न जानासि? अधुना बहि: खाद्यवस्तूनि न खादितव्यानि। एतत् चूर्णं स्वीकरोतु।<br>**राजीव:** - (iii)...............................................................।<br>**वैद्य:** - अरे नहि! कटु: नास्ति। पुनरपि औषधे: कृते स्वाद: न गणनीय:।<br>**राजीव:** - (iv) ...................................................।<br>**वैद्य:** - दिने त्रिवारम् एकचमसमात्रम् उष्णजलेन ग्रहीतव्यम्।<br>**राजीव:** - (v) ................................................ । | 1×5=5 |

| | | |
|---|---|---|
| | **वैद्यः** - पुनः आगमनस्य आवश्यकता एव न भविष्यति । स्वास्थ्यं प्रति भविष्ये जागरूकः भव। आरोग्यं परमं सुखम्।<br>**राजीवः** - धन्यवादः। प्रणमामि। | |
| | | |
| 4. | **'हिमालयः' इति विषये प्रदत्तशब्दसहायतया पञ्चवाक्येषु एकम् अनुच्छेदं लिखत । (मञ्जूषाप्रदत्तपदानां सहायता अपेक्षिता चेत् ग्रहीतव्या अन्यथा स्वयं चिन्तयित्वा स्वतन्त्ररूपेण लेखितव्यम्।)**<br><br>**मञ्जूषा-**<br><br>प्रहरी, उत्तरस्यां दिशि, नद्यः, वृष्टिः, मेघाः, हिमच्छादितानि, शिखराणि, भूमिः, उर्वरा , सिञ्चन्ति, शस्यश्यामला।<br><br>**अथवा**<br><br>**निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत -(केवलं वाक्यपञ्चकम्)**<br>(i) अरविन्द पत्र लिखता है।<br>Arvind writes letter.<br>(ii) वह कक्षा में प्रथम स्थान प्राप्त करेगा।<br>He will be securing first position in the class.<br>(iii) गाँव के दोनों ओर वृक्ष हैं।<br>There are trees on both the sides of the village.<br>(iv) मेरे घर संगीत का कार्यक्रम हुआ था।<br>There was a music program at my place.<br>(v) गंगा हिमालय से प्रकट होती है।<br>Ganga originates from Himalayas.<br>(vi) कवियों में कालिदास श्रेष्ठ है।<br>Kalidas is best of all the poets.<br>(vii) शिक्षक छात्र को पुस्तक देता है।<br>Teacher gives book to child. | 1×5=5<br><br><br><br><br><br><br><br>1×5=5 |

| | | |
|---|---|---|
| | **पठितावबोधनम्** | |
| 5. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**<br>वत्सराजस्य इदं वचनमाकर्ण्य कुपितो राजा प्राह - त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद् विधेयम्। पुनः वत्सराजः राजाज्ञा पालनीयैवेति मत्वा तूष्णीं बभूव। अनन्तरम् अनिच्छन्नपि वत्सराजः भोजं रथे निवेश्य रात्रौ वनं नीतवान्। तत्र आत्मनो वधयोजनां ज्ञात्वा भोजः किमपि वत्सराजं कथितवान्। तद्वचनैः वैराग्यमापन्नो वत्सराजः तं न हतवान्, अपितु गृहमागत्य भोजं गृहाभ्यन्तरे भूमौ निक्षिप्य रक्ष। पुनः कृत्रिमरूपेण भोजस्य मस्तकं कारयित्वा, राजभवनं गत्वा वत्सराजो राजानं प्राह- श्रीमता यदादिष्टं तत्साधितमिति। ततो राजा भोजवधं ज्ञात्वा तं पृष्टवान्- वत्सराज! खड्गप्रहारसमये तेन किमुक्तम् ? | 3 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) कुपितराज्ञः वचनं श्रुत्वा कः तूष्णीं बभूव?<br>(ii) अनिच्छन् अपि वत्सराजः भोजं कुत्र नीतवान्?<br>(iii) वत्सराजः कस्य मस्तकं कारितवान्? | ½×2=1 |
| | **(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नैकम्)**<br>(i) कुपितो राजा किं प्राह?<br>(ii) राजा भोजवधं ज्ञात्वा किं पृष्टवान्? | 2×1=2 |
| | | |
| 6. | **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**<br>**गुणी गुणं वेत्ति न वेत्ति निर्गुणः**<br>**बली बलं वेत्ति न वेत्ति निर्बलः।**<br>**पिको वसन्तस्य गुणं न वायसः**<br>**करी च सिंहस्य बलं न मूषकः॥** | 3 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) कः गुणं वेत्ति?<br>(ii) सिंहस्य बलं कः न जानाति?<br>(iii) वायसः कस्य गुणं न जानाति? | ½×2=1 |
| | **(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नैकम्)**<br>(i) बलस्य महत्त्वं कः जानाति कः च न जानाति?<br>(ii) निर्गुणः जनः किं न वेत्ति? | 1×2=2 |

| | | |
|---|---|---|
| 7. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>**कुण्डला** - सखि मदालसे! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि?<br>**मदालसा** - ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।<br>**कुण्डला** - ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।<br>**मदालसा** - किं श्रुतं त्वया यत् गुरुवर्यैः मामधिकृत्य पित्रे कथितम्?<br>**कुण्डला** - अथ किम्! राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता,परं तया स्वयं वरः न प्राप्तः अतः तस्यै योग्यवरस्य अन्वेषणं कार्यम् इत्यासीद् गुरुपादानां मतम्।<br>**मदालसा** - (हसित्वा) नहि जानन्ति ते यदहं विवाहबन्धनं स्वीकर्तुं न इच्छामि।<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) अनन्तपारः कः?<br>(ii) का सर्वविद्यानिष्णाता जाता?<br>(iii) मदालसा किं स्वीकर्तुं न इच्छति?<br>(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नैकम्)<br>(i) कुलगुरुः मदालसायाः विषये पितरं प्रति किं कथितवान्?<br>(ii) गुरुपादानां मतं किम् अस्ति? | 3<br><br>½×2=1<br><br>2×1= 2 |
| | | |
| 8. | अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –<br>**न दुर्जनः सज्जनतामुपैति शठः सहस्रैरपि शिक्ष्यमाणः**<br>**चिरं निमग्नोऽपि सुधा-समुद्रे न मन्दरो मार्दवमभ्युपैति॥**<br><br>**भावार्थः–** दुर्जनः शठः (i) ----------- सज्जनैः अपि शिक्ष्यमाणः कदाचित् (ii) ---------- न प्राप्नोति। यथा अमृतस्य समुद्रे चिरकालं यावत् (iii) ----------- मन्दरः पर्वतः (iv) ---------- न प्राप्नोति। अतः शठस्य अवबोधनं तु सर्वथा व्यर्थमेव।<br>**मञ्जूषा**<br>सज्जनताम्, कोमलत्वम्, सहस्रैः, निमग्नः | ½×4=2 |

| | | |
|---|---|---|
| | **अथवा**<br>प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-<br>**(क) कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते।**<br>(i) यः मनुष्यः कर्माणि आरभते सः समृद्धिं प्राप्नोति।<br>(ii) पुरुषः श्रियं न प्राप्नोति।<br>(iii) कर्मणा पुरुषः लक्ष्मीं न निषेवते।<br><br>**(ख) 'त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः'**<br>(i) नरकस्य द्वारं त्रिविधम् उच्यते लोभः असत्यम् श्रमः च।<br>(ii) नरकस्य द्वारेषु प्रवेशः कठिनतमः इत्यर्जुनः कथयति।<br>(iii) मानवस्य आत्मनः नाशाय कामः क्रोधः लोभः च एतानि त्रीणि नरकस्य द्वाराणि एव। | 1x2=2 |
| | | |
| 9. | अधोलिखित-अन्वये मंजूषायाः साहाय्येन रिक्तस्थानानि पूरयत –<br>**कर्णामृतं सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलानाम्।**<br>**निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव॥**<br><br>**अन्वयः –** खलानां (i) ----------- सूक्तिरसं विमुच्य दोषेषु (ii)------- यत्नः (भवति) यथा क्रमेलकः (iii) --------- प्रविश्य कण्टकजालम् एव (iv)---------।<br><br>**मञ्जूषा -** केलिवनम् , कर्णामृतम् , निरीक्षते , सुमहान् । | ½x4=2 |
| | | |
| 10. | 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -<br>**'क' स्तम्भः** — **'ख' स्तम्भः**<br>(i) ज्ञाने मौनं क्षमा शक्तौ — - विभूषणं मौनमपण्डितानाम्<br>(ii) कांस्यं यथा हि कुरुते — - त्यागे श्लाघाविपर्ययः<br>(iii)रूपं प्रसिद्धं न बुधास्तदाहुः — - अतितरां निनादं<br>(iv)विशेषतः सर्वविदां समाजे — - विद्यावतां वस्तुत एव रूपम् | ½x4=2 |

------------------ ------------------